दिनाङ्कः-30.03.2024

सायम् - 06:20

**मुख्यवार्ता:**

- राष्ट्रपतिना द्रौपदी मुर्मु इत्यनया राष्ट्रपति भवने प्राक्तनौ प्रधानमन्त्रिणौ पी.वी.नरसिम्हाराव:, चौधरीचरणसिंह:, कृषि-वैज्ञानिक:एम एस. स्वामीनाथन:, बिहारस्य प्राक्तन: मुख्यमन्त्री कर्पूरीठाकुरश्च सर्वोच्च 'भारतरत्न' इति भारतीय नागरिक सम्माननेन मरणोपरान्ते सम्मानिता:।

- भारतस्य वैदेशिकमुद्रागार: चत्वारिंशदुत्तरैक-शत-मिलियन-डॉलर-परिमितौ वरीवर्ध्य-प्रामश: त्रिचत्वारिशंदुत्तर-षड्शत-बिलियन डॉलर-परिमितम् जातम्।

- अतिवृष्ट्या जातेन भूस्खलनेन जम्मू-श्रीनगर-राष्ट्रिय-राजमार्ग: यातायातानिमित्तये अवरोधितोऽस्ति।

- भारतर्तु-विज्ञान-विभागेन अद्यारभ्य पूर्वोत्तर भारते विद्युद्ध्वनिना सह अतिवृष्टि: प्रकल्पितास्ति।

- आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायां लखनऊनगरे अद्य संध्यायाम् अटल-बिहारी-वाजपेयी-एकाना-क्रीडांणे लखनऊ-सुपर-जायन्ट्सदलं पंजाब-किंग्सदलं सम्मुखीकरिष्यति।

## अथ वार्ता: विस्तरेण

**भारतरत्ना:**

राष्ट्रपतिना द्रौपदी मुर्मु इत्यनया राष्ट्रपति भवने समायोजिते कार्यक्रमे प्राक्तनौ प्रधानमन्त्रिणौ पी.वी.नरसिम्हाराव:, चौधरीचरणसिंह:, कृषि-वैज्ञानिक:एम एस. स्वामीनाथन:, बिहारस्य प्राक्तन: मुख्यमन्त्री कर्पूरीठाकुरश्च सर्वोच्च 'भारतरत्न' इति भारतीय नागरिक सम्माननेन मरणोपरान्ते सम्मानिता:।

एतेषां महत्पुरूषाणां परिजनै: सम्मानं गृहीतम्। समारोहेऽस्मिन् अद्य उपराष्ट्रपति:, प्रधानमन्त्री, गृहमन्त्री, कांग्रेसदलप्रमुख:, विदेशमन्त्री, बिहारस्य मुख्यमन्त्री च अतिथित्वेन उपस्थिता: आसन्। तत्रैव प्राक्तनाय उपप्रधानमन्त्रिणे श्रीलालकृष्ण- आडवाणी वर्याय सम्मानमिदं श्व: नवदिल्यां राष्ट्रपति भवने प्रदास्यते।

**प्रधानमन्त्री-भारतरत्नम्**

प्रसंगेऽस्मिन् प्रधानमन्त्री नरेन्द्रमोदी पूर्वप्रधानमन्त्रिणो: चौधरी चरणसिंह-पी.वी.नरसिम्हारावयो: बिहार राज्यस्य पूर्वमुख्यमन्त्रिण: कर्पूरीठाकुरस्य प्रसिद्ध वैज्ञानिकस्य च डॉ एम्. एस. स्वामिनाथनस्य योगदानं प्रशंसितवान्। एते महज्जना: अद्य भारतरत्नसम्मानेन अलंकृता:। प्रधानमन्त्री एकस्मिन् सामाजिकसन्देश पटले लिखितवान् यत् एतत् भारतरत्नसम्मानं देशस्य विकासे विशिष्टतया कृषि-ग्रामीण-विकासयो: चौधरीचरण- सिंहस्य योदानायास्ति। असौ कथितवान् यत् पीवी नरसिम्हारावेन राष्ट्रप्रगतये आधुनिकीकरणाय च बृहत्तमस्तरे कार्यं निष्पादितम् आसीत्। एष: महोदय: एक: सम्मानितिविद्वान विचारकत्वेनाभिज्ञायते। कर्पूरीठाकुरं स्वीयवक्तव्ये निध्याय प्रधानमन्त्री प्रावोचत् यत् भारतरत्न- सम्मानं तस्मै श्रद्धांजलिस्वरूपं वर्तते। येन स्वीय सम्पूर्णजीवनं समाजिकन्याय-समानतायाभ्यां समर्पितम् अपि च डॉ.एम्.एस्. स्वामिनाथन-इत्यस्य प्रयासै: भारतदेश: खाद्योत्पादनक्षेत्रे उत्तुंग शिखरे स्थापितोस्तीति।

**विदेशीमुद्राभण्डार:**

द्वाविशमार्चे समाप्ते सप्ताहे भारतस्य वैदेशिकमुद्रागार: चत्वारिंशदुत्तरैक-शत-मिलियन-डॉलर-परिमितौ वरीवर्ध्य-प्रायश: त्रिचत्वारिशंदुत्तर-षड्शत-बिलियन डॉलर-परिमितम् जातम्।

**संस्कृतवार्ताया: संस्करणमिदम् इदानीम् आकाशवाणीत: प्रसार्यते। सममेव अयं कार्यक्रम: आकाशवाण्या: अन्तर्जालपटले www.newsonair.com इत्यत्र, अथ newsonair चलदूरभाषीय-तन्त्रांशे अपिउपलब्धो भविष्यति।**

**जम्मूकश्मीर-राजमार्गविरूद्ध:**

रामबन प्रखण्डे अतिवृष्ट्या जातेन भूस्खलनेन जम्मू-श्रीनगर-राष्ट्रिय-राजमार्ग: यातायातानिमित्तये अवरोधितोऽस्ति। राष्ट्रिय-राजमार्ग अधिकारिणा रोहित बास्कोटा इत्यनेन उक्तं यत् राजमार्गस्य अवरोधत्वान् नाशरी-बरिहालयोर्मध्ये

नैकानि वाहनानि अवरूद्धानि सन्तीति। तेन राजमार्गस्य पुनर्निर्माणं यावत् जना: अस्य मार्गस्य उपयोगं मा कुर्वन्त्विति निवेदितम्।

**भारतर्तु-जलवयुविज्ञानम्**

भारतर्तु-विज्ञान-विभागेन अद्यारभ्य पूर्वोत्तर भारते विद्युद्ध्वनिना सह अतिवृष्टि: प्रकल्पितास्ति। अनेन विभागेन श्व: यावत् उत्तर-पश्चिमीय-भारते अल्पत: मध्यमवृष्टि: अनुमानिता अपि च विभिन्नेषु पश्चिमी-हिममालयीय-क्षेत्रेषु अतिवृष्ट्या: सम्भावना प्रख्यापितास्ति। विभागेन संसूचितं यत् अरुणाचलप्रदेश-असम-मेघालय-राज्यानां विविधेषु स्थलेषु अतिवृष्टि: हिमपातश्च भविष्यति। ऋतुविभागेन ओडिशा-गांगीय पश्चिमबंगाल-झारखण्ड-बिहारराज्येषु अल्पवृष्ट्या: सम्भावना प्रकटितास्ति। तत्रैव अद्य जम्मूकश्मीर-लद्दाख-गिलगित-मुजफ्फराबाद-हिमाचलप्रदेश-उत्तराखण्ड-प्रदेशानां विविधस्थलेषु महतीवृष्टि: हिमपातश्च प्रकल्पित:अस्ति।

**हिमाचलप्रदेश-हिमपात:**

हिमाचलप्रदेशं समेत्य राजधान्यां शिमलायां गतरात्रे: नैरन्तर्येण महतीवृष्टि: तुषारवृष्टिश्च भवति। पश्चिमीय-विक्षोभकारणात् ऋतुपरिवर्तनेन किन्नौर-कुल्लू-चम्बा-कांगडा-शिमला-लाहौलस्फीति-स्थलानि हिमपातेन आच्छादितानि जातानि। लाहौलस्पीति इत्येतस्य तुंगस्थलानि अद्य प्रात: हिमपातोज्वलानि भूतानि। अन्येषु पर्वतीयस्थलेषु तुषारवृष्ट्या यातायातमार्ग: अवरूद्धो जात:। किन्नौरक्षेत्रे प्रात:कालादेव तीव्रवायु प्रवाहेन सह महती तुषारवृष्टि: पतिता। येन हि हिमस्खलसंकट: समुत्पन्नो जात:। किन्नौरस्य उपायुक्तेन अमितशर्मणा निवासिभ्य: पर्यटककेभ्यश्च यात्रार्थं परामर्श: नैव प्रदत्त:। राज्य- ऋतु-विज्ञानकेन्द्रेण श्व: यावत् राज्यस्य अनेकेषु भागेषु वृष्टि: हिमपातश्च प्रकल्पित:।

**अभिविन्यास-कुलगाम**

कश्मीरोपत्यकायां, कुलगामस्य जनपद-निर्वाचन-कार्यालयेन ह्य: लोकसभा-निर्वाचनात् प्राक् जनपदस्य विभिन्नानां महाविद्यालयानां उच्चतर-माध्यमिक-विद्यालयनाञ्च एन्.सी.सी. एन.एस.एस. इत्युभाभ्यां समूहाभ्यां परिसर-प्रतिनिधिभ्यश्च एकदिवसीय: अभिविन्यासकार्यक्रम: समायोजित:। जनपदस्तरीय-प्रशिक्षण- प्रमुख: शौकत-अहमद-वानी इत्येष: विधानसभास्तरीय: प्रशिक्षणप्रमुख: मुश्ताक-अहमदश्च छात्रेभ्य: उपस्थितेभ्य: जनेभ्यश्च निर्वाचन-समये-यूनां भूमिकाया: विषये सूचनां प्रदत्तवन्तौ। अत्रावसरे छात्र-स्वयंसेवका: निर्वाचन- प्रक्रिया -

विषयाणां सूचनां अभिस्वीकृतवन्त:, ते अनया प्रक्रियया परिचिताश्च जाता:। एते स्वयंसेवकछात्रा: सोत्साहेन अस्मिन् कार्यक्रमे भागं भजितवन्त:।

**जम्मूकश्मीर-स्वीप**

जम्मूकश्मीरराज्ये सुव्यवस्थित-मतदातृ-शिक्षा-निर्वाचक-सहभागिता-कार्यक्रमस्य एकस्याभियानस्यान्तर्गतम् एका सजीवन्त-मेहन्दी-प्रतियोगिता आंगनवाडी-कार्यकर्तृभ्य: शुक्रवासरे उधमपुरजनपदे पूर्व-रठियां क्षेत्रस्य आंगनवाडी केन्द्र-पंचायतस्थले समायोजिता। अस्माकं वार्ताहर: प्रख्यापितवान् यत् अस्य आयोजनस्योद्देश्यम् इदमसीत् यत् ''मतदानं कुर्वन्तु राष्ट्रनिर्माणञ्च कुर्वन्तु'' इत्यनेनोद्घोषेण सह मतदातृ-जागरूकाभियानस्य संवर्धनम्। एतस्यां प्रतियोगितायां अनेका: उत्साहिन्य: आगनवाडीकार्यकर्त्र्य: भागम् अभजन्।

**साहित्य-संस्कृती-जम्मूकश्मीर**

जम्मू-कश्मीरे क्षेत्रीय-**साहित्यसंस्कृत्योर्त्रि-** दिवसीय: 'तवी' साहित्य-लोकोत्सव: जम्मूनगरस्य अभिनवसभागरे समारब्ध:। अस्मत्वार्ताहरेण प्रोक्तं यत् कार्यक्रमोऽयं जम्मू-कश्मीरयो: कलासंस्कृतिभाषा-अकादम्या अथ च इंदिरागांधी- राष्ट्रिय-कला- केन्द्र- द्वारा च संयुक्त- तत्वावधानत्वेन समायोज्यते। अत्र विभिन्नानि सत्राणि, सांस्कृतकार्यक्रमा: प्रतिस्पर्धाश्च समायोजयिष्यन्ते।

**भाजपा-घोषणा-पत्रम्**

भाजपेति दलाध्यक्ष: जगत्प्रकाश-नडडा इत्यनेन आगामिनं लोकसभानिर्वाचनम् अभिलक्ष्य नैर्वाचनिक घोषणा पत्र समिति: घोषिता:। सप्तविंशति: सदस्यानां समिते: अध्यक्ष्यं श्रीराजनाथसिंह: करिष्यति। वरिष्ठा भाजपेतिदलनेत्री निर्मला सीतारामन: समिते: संयांजिका, पीयूषगोयलश्च सहसंयोजक: भविष्यति।

–

**आई.पी.एल-क्रिकेट**

आई.पी.एल्. इत्यस्यां क्रिकेट-प्रतिस्पर्धायां लखनऊनगरे अद्य अटल-बिहारी वाजपेयी-एकाना-क्रीडांणे लखनऊ-सुपर-जायन्ट्सदलं पंजाब-किंग्सदलं सम्मुखीकरिष्यति। ह्य: बेंगलुरू-नगरस्य एम्. चिन्नास्वामि क्रीडांगणे कोलकाता-नाइट-राइडर्सदलेन रॉयल-चैलेन्जर्स-बेंगलुरूदलं सप्तस्तोभै: पराजितम्।

**।। इति वार्ता: ।।**